पयोनिधिः, पुं, (पयांसि निधीयन्तेऽस्मिन् । धा धारणे + अधिकरणे किः ।) समुद्रः । यथा,—
"न गणितं यदि जन्म पयोनिधौ
हरशिरःस्थितिभूरपि विस्मृता ।"
इति नैषधे । ४ । ५० ॥ (पय इव शुक्लः सत्त्वगुणः निधीयतेऽत्र इति विग्रहे । शिवः । यथा, महाभारते । १३ । १७ । ८७ ।
"लम्बनो लम्बितोष्ठश्च महामायः पयोनिधिः ॥")

पयोरः, पुं, (पयो जलं रातीति । रा + कः ।) खदिरः । इति शब्दचन्द्रिका ॥

पयोलता, स्त्री, (पयः क्षीरं तेनाढ्या लता ।) क्षीरविदारी । इति राजनिर्घण्टः ॥

पयोव्रतः, पुं, (पयोमात्रपानसाध्यो व्रतः ।) पयोमात्रपानरूपव्रतविशेषः । यथा,—
"पुण्यां तिथिं समासाद्य युगमन्वन्तरादिकम् ।
पयोव्रतस्त्रिरात्रं स्यादेकरात्रमथापि वा ॥"
इति मात्स्ये १५२ अध्यायः ॥ * ॥
द्वादशाहसाध्यविष्णुव्रतविशेषः । यथा,—
कश्यप उवाच ।
"एतन्मे भगवान् पृष्टः प्रजाकामस्य पद्मजः ।
यदाह ते प्रवक्ष्यामि व्रतं केशवतोषणम् ॥
फाल्गुनस्यामले पक्षे द्वादशाहं पयोव्रतः ।
अर्च्चयेदरविन्दाक्षं भक्त्या परमयान्वितः ॥
सिनीवाल्यां मृदालिप्य स्नायात् क्रोडविदीर्णया ।
यदि लभ्येत वै स्रोतस्येतन्मन्त्रमुदीरयेत् ॥
त्वं देव्यादिवराहेण रसायाः स्थानमिच्छता ।
उद्धृतासि नमस्तुभ्यं पाप्मानं मे प्रणाशय ॥
निर्व्वर्त्तितात्मनियमो देवमर्च्चेत् समाहितः ।
अर्च्चायां स्थण्डिले सूर्य्ये जले वह्नौ गुरावपि ॥
नमस्तुभ्यं भगवते पुरुषाय महीयसे ।
सर्व्वभूतनिवासाय वासुदेवाय साक्षिणे ॥
नमोऽव्यक्ताय सूक्ष्माय प्रधानपुरुषाय च ।
चतुर्विंशद्गुणज्ञाय गुणसंख्यानहेतवे ॥
नमो द्विशीर्ष्णे त्रिपदे चतुःशृङ्गाय तन्तवे ।
सप्तहस्ताय यज्ञाय त्रयीविद्यात्मने नमः ॥
नमः शिवाय रुद्राय नमः शक्तिधराय च ।
सर्व्वविद्याधिपतये भूतानां पतये नमः ॥
नमो हिरण्यगर्भाय प्राणाय जगदात्मने ।
योगैश्वर्य्यशरीराय नमस्ते योगहेतवे ॥
नमस्त आदिदेवाय साक्षिभूताय ते नमः ।
नारायणाय ऋषये नराय हरये नमः ॥
नमो मरकतश्यामवपुषेऽधिगतश्रिये ।
केशवाय नमस्तुभ्यं नमस्ते पीतवाससे ॥
त्वं सर्व्ववरदः पुंसां वरेण्य वरदर्षभ ! ।
अतस्ते श्रेयसे धीराः पादरेणुमुपासते ॥
अन्ववर्त्तन्त यं देवाः श्रीश्च तत्पादपद्मयोः ।
स्पृहयन्त इवामोदं भगवान्मे प्रसीदताम् ॥
एतैर्म्मन्त्रैर्हृषीकेशमावाहनपुरस्कृतम् ।
अर्च्चयेच्छ्रद्धया युक्तः पाद्योपस्पर्शनादिभिः ॥
अर्च्चित्वा गन्धमाल्याद्यैः पयसा स्नापयेद्विभुम् ।
वस्त्रोपवीताभरणपाद्योपस्पर्शनैस्ततः ॥
गन्धधूपादिभिश्चार्च्चेद्द्वादशाक्षरविद्यया ।
शृतं पयसि नैवेद्यं शाल्यन्नं विभवे सति ॥
ससर्पिः सगुडं दत्त्वा जुहुयान्मूलविद्यया ।
निवेदितं तद्भक्ताय दद्याद्भुञ्जीत वा स्वयम् ॥
दत्त्वाचमनमर्च्चित्वा ताम्बूलञ्च निवेदयेत् ।
जपेदष्टोत्तरशतं स्तवीत स्तुतिभिः प्रभुम् ॥
कृत्वा प्रदक्षिणं भूमौ प्रणमेद्दण्डवन्मुदा ।
कृत्वा शिरसि तच्छेषं देवमुद्वासयेत्ततः ॥
द्व्यवरान् भोजयेद्विप्रान् पायसेन यथोचितम् ।
भुञ्जीत तैरनुज्ञातः शेषं सेष्टः सभाजितैः ॥
ब्रह्मचार्य्यथ तद्रात्र्यां श्वोभूते प्रथमेऽहनि ।
स्नातः शुचिर्यथोक्तेन विधिना सुसमाहितः ॥
पयसा स्नापयित्वार्च्चेद्यावद्व्रतसमापनम् ।
पयोभक्षो व्रतमिदं चरेद्विष्ण्वर्च्चनादृतः ॥
पूर्व्ववज्जुहुयादग्निं ब्राह्मणांश्चापि भोजयेत् ।
एवन्त्वहरहः कुर्य्याद्द्वादशाहं पयोव्रतम् ॥
हरेराराधनं होममर्हणं द्विजतर्पणम् ।
प्रतिपद्दिनमारभ्य यावत् शुक्लत्रयोदशीम् ॥
ब्रह्मचर्य्यमधःस्वप्नं स्नानं त्रिषवनञ्चरेत् ।
वर्ज्जयेदसदालापं भोगानुच्चावचांस्तथा ॥
अहिंस्रः सर्व्वभूतानां वासुदेवपरायणः ।
त्रयोदश्यामथो विष्णोः स्नपनं पञ्चकैर्विभोः ॥
कारयेच्छास्त्रदृष्टेन विधिना विधिकोविदैः ।
पूजाञ्च महतीं कुर्य्याद्वित्तशाठ्यविवर्ज्जितः ॥
चरुं निरूप्य पयसि शिपिविष्टाय विष्णवे ।
सूक्तेन तेन पुरुषं यजेत सुसमाहितः ॥
नैवेद्यञ्चातिगुणवद्दद्यात् पुरुषतुष्टिदम् ।
आचार्य्यं ज्ञानसम्पन्नं वस्त्राभरणधेनुभिः ॥
तोषयेदृत्विजश्चैव तद्विद्ध्याराधनं हरेः ।
भोजयेत्तान् गुणवता सदन्नेन शुचिस्मिते ॥
अन्यांश्च ब्राह्मणान् शक्त्या ये च तत्र समागताः ।
दक्षिणां गुरवे दद्यादृत्विग्भ्यश्च यथार्हतः ॥
अन्नाद्येनाश्वपाकांश्च प्रीणयेत् समुपागतान् ।
भुक्तवत्सु च सर्व्वेषु दीनान्धकृपणेषु च ॥
विष्णोस्तत् प्रीणनं विद्वान् भुञ्जीत सह बन्धुभिः ।
नृत्यवादित्रगीतैश्च स्तुतिभिः स्वस्तिवाचनैः ॥
कारयेत्तत्कथाभिश्च पूजां भगवतोऽन्वहम् ।
एतत् पयोव्रतं नाम पुरुषाराधनं परम् ॥
पितामहेनाभिहितं मया ते समुदाहृतम् ।
त्वञ्चानेन महाभागे ! सम्यक् चीर्णेन केशवम् ॥
आत्मना शुद्धभावेन नियतात्मा भजाव्ययम् ।
अयं वै सर्व्वयज्ञाख्यः सर्व्वव्रतमिति स्मृतम् ॥
तपःसारमिदं भद्रे दानञ्चेश्वरतर्पणम् ।
त एव नियमाः साक्षात्त एव च यमोत्तमाः ॥
तपो दानं व्रतं यज्ञो येन तुष्यत्यधोक्षजः ।
तस्मादेतद्व्रतं भद्रे प्रयता श्रद्धया चर ॥
भगवान् परितुष्टस्ते वरानाशु विधास्यति ॥"
इति श्रीभागवते ८ स्कन्धे १६ अध्यायः ॥

पयोष्णिजाता, स्त्री, (पयोष्णी नाम्नी नदी जाता यस्याः । पृषोदरात् साधुः ।) सरस्वती नदी । इति राजनिर्घण्टः ॥

पयोष्णी, स्त्री, (पयः सलिलं उष्णं उष्णगुणं वा ऽस्याः ।) नदीविशेषः । सा विन्ध्याचलदक्षिणे प्रसिद्धा । अस्या जलगुणाः ।
"पयोष्णीसलिलं रुच्यं पवित्रं पापनाशनम् ।
सर्व्वामयहरं सौख्यबलकान्तिप्रदं लघु ॥"
इति राजनिर्घण्टः ॥

परं, क्ली, (पॄ + "ऋदोरप् ।" ३ । ३ । ५७ । इति अप् ।) केवलम् । इति मेदिनी ॥ मोक्षः । यथा । कैवल्यमन्यतं परम् । इति मुक्तिपर्य्याये रत्नावली ॥ (ब्रह्म ब्रह्मा च । यदुक्तं श्रुतौ ।
"द्वे ब्रह्मणी वेदितव्ये परञ्चापरमेव च ॥"
विष्णुः । यथा, महाभारते । १३ । १४९ । २० ।
"प्रभूतस्त्रिककुद्धाम पवित्रं मङ्गलं परम् ॥"
ब्रह्मण आयुः । यथा, मार्कण्डेये । ४६ । ४२ ।
"एवन्तु ब्रह्मणो वर्षमेकं वर्षशतन्तु तत् ।
शतं हि तस्य वर्षाणां परमित्यभिधीयते ।
पञ्चाशद्भिस्तथावर्षैः परार्द्धमिति कीर्त्त्यते ॥")

परं, [म्] व्य, नियोगः । क्षेपः । इति मेदिनी ॥

परः, पुं, (पॄ + अच् ।) शत्रुः । इत्यमरः ॥ (यथा, रघुः । ७ । ६७ ।
"इतः परानर्भकहार्य्यशस्त्रान्
वैदर्भि ! पश्यानुमता मयासि ॥")
ब्रह्मण आयुः । यथा,—
"कालसंख्यां समासेन पूर्व्वार्द्धद्वयकल्पिताम् ।
स एव स्यात् परः कालस्तदन्ते परिपूर्य्यते ॥
निजेन तस्य मानेन आयुर्व्वर्षशतं स्मृतम् ।
तत् पराख्यं तदर्द्धञ्च परार्द्धमभिधीयते ॥"
अपि च ।
"त्रीणि कल्पशतानि स्युस्तथा षष्टिर्द्विजोत्तमाः ।
ब्रह्मणः कथितं वर्षं पराख्यं तच्च तत् पदम् ॥"
इति कौर्म्मे ५ अध्यायः ॥
(शिवः । यथा, तत्रैव । १३ । १७ । ६७ ।
"कपिलः कपिशः शुक्ल आयुश्चैव परोऽपरः ॥")

परः, त्रि, श्रेष्ठः । (यथा, आर्य्यासप्तशत्याम् । ३५५ ।
"परमोहनाय मुक्तो निष्करुणो
तरुणि ! तव कटाक्षोऽयम् ।
विशिख इव कलितकर्णः
प्रविशति हृदयं निःसरति ॥")
अरिः । दूरः । अन्यः । उत्तरः । इति मेदिनी ॥ * ॥
न्यायमते द्रव्यगुणकर्म्मवृत्तिसत्ता । इयं व्यापकजातिः । यथा,—
"सामान्यं द्विविधं प्रोक्तं परञ्चापरमेव च ।
द्रव्यादित्रिकवृत्तिस्तु सत्ता परतयोच्यते ॥
परभिन्ना तु या जातिः सैवापरतयोच्यते ।
द्रव्यत्वादिकजातिस्तु परापरतयोच्यते ॥
व्यापकत्वात् परापि स्यात् व्याप्यत्वादपरापि च ॥"
इति भाषापरिच्छेदे । ८—९ ॥ * ॥
परान्नादिभक्षणादेः श्रीनाशकत्वं यथा,—
"परान्नञ्च परस्वञ्च परशय्या परस्त्रियः ।
परवेश्मनि वासश्च शक्रादपि हरेच्छ्रियम् ॥"
इति गरुड़पुराणम् ॥ * ॥
श्रेष्ठवाचकपरशब्दप्रयोगाः । यथा,—
"अन्नदातुः शतगुणोऽभयदेवः परः स्मृतः ।
गुरुस्तस्माच्छतगुणो विद्यामन्त्रप्रदायकः ॥